संस्कृत-शिक्षा ।

(REVISED EDITION.)

शिलं-गवर्णमेण्ट-उच्च-इंरेजी विद्यालयस्य
संस्कृताध्यापकेन
श्रीरसिकचन्द्र-विद्यानिधि-काव्यरत्नेन
प्रणीता ।



कलिकाता-घोषकोम्पानिपुस्तकालयात्
एस्. घोषेण प्रकाशिता ।

संशोधित-द्वितीयसंस्करण ।

1916.

Price Annas six only.

Published by
S. GHOSH, B. A.,
from
Messers GHOSH & Co.,
Publishers and Book-sellers,
"Cornwallis Buildings",
1, Cornwallis Street, Calcutta.

PRINTED BY K. C. DAS,
METCALFE PRINTING WORKS,
34, Machuabazar Street, Calcutta.

PREFACE.

The following pages are the outcome of a desire to place in the hands of our young learners of Sanskrit some easy lessons in the language, which, while illustrating the use of the case-endings and simple rules of composition in idiomatic Sanskrit, will contribute to the up-building of their moral life. In order to secure this object the author laid the most popular sacred books of the Hindus under contribution, and collected from them a large number of verses teaching principles of morality without which no system of ethics can be regarded as perfect. The Mahabharat and the Manusanhita abound in lessons teaching implicit obedience to the king and the law. The author has collected some of the very best of these lessons. No pains have been spared to make the reading lessons interesting and useful both intellectually and morally.

In conclusion, the author gladly avails himself of this opportunity to acknowledge his indebtedness to Babu Bidhu Bhusan Goswami, M.A., Senior Professor of Sanskrit in the Dacca College, Babu Akshay Kumar Datta Gupta, M.A., Assistant translator to the Government of Eastern Bengal and Assam, and especially to Babu Vanamali Chakrabarty, Vedantatirtha, M.A., Professor, Cotton College, Gauhati, and Babu Radha Gobinda Basak, M. A., for the much valuable help rendered by them in the compilation of this little work.

THE AUTHOR.

REVISED EDITION.

In this edition I have tried to correct all the mistakes of the previous edition and for the convenience of the students ; Sanskrit alphabets and sentences for translation and for correction have been suffixed.

I am glad to express my indebtedness to Babu Nalini Mohan Sastri, M. A., Professor of Sanskrit, Murarichand College, who has kindly revised the book.

SHILLONG,
August 8, 1916.

THE AUTHOR.

संस्कृत-शिक्षा ।

प्रथमः परिच्छेदः ।

स्वरवर्णाः ।

अ	आ	इ	ई	उ
অ	আ	ই	ঈ	ঊ
અ	આ	ઇ	ઈ	ઉ
ଅ	ଆ	ଇ	ଈ	ଉ
ঌ	ঋ	ঌ	ঌ	ঌ
ऊ	ऋ	ॠ	ऌ	ॡ
ঊ	ঋ	ৠ	ঌ	ঌ
ઊ	ઋ	ૠ	ઌ	ૡ
ଊ	ଋ	ୠ	ଌ	ୡ
ए	ऐ	ओ	औ ।	
এ	ঐ	ও	ঔ ।	
એ	ઐ	ઓ	ઔ ।	
ଏ	ଐ	ଓ	ଔ ।	

व्यञ्जनवर्णाः।

क	ख	ग	घ	ङ।
क	ख	ग	घ	ङ।
च	छ	ज	झ	ञ।
च	छ	ज	झ	ञ।
ट	ठ	ड	ढ	ण।
ट	ठ	ड	ढ	ण।
त	थ	द	ध	न।
त	थ	द	ध	न।
प	फ	ब	भ	म।
प	फ	ब	भ	म।
य	र	ल	व।	
य	र	ल	व।	
श	ष	स	ह।	:।
श	ष	स	ह।	ं ः।

आकारादि-स्वरयोगः।

का	कि	की	कु	कू	कृ
कॄ	कॢ	के	कै	को	कौ

य-योगः।

क्य	ख्य	ग्य	घ्य	च्य	छ्य
ज्य	झ्य	ञ्य	ठ्य	ड्य	ढ्य
ण्य	त्य	थ्य	द्य	ध्य	न्य
प्य	फ्य	ब्य	भ्य	म्य	य्य
ल्य	व्य	श्य	ष्य	स्य	ह्य

र-योगः।

क्र	ग्र	ज्र	त्र	प्र	ब्र
क्र	ग्र	ज्र	त्र	प्र	ब्र

श्र	ह्र।
श्र	ह्र।

ल-योगः।

क्ल	ख्ल	ग्ल	घ्ल	ट्ल	म्ल
क्ल	ख्ल	ग्ल	घ्ल	ट्ल	म्ल

ष्ल	ह्ल।
ष्ल	ह्ल।

व-योगः।

क्व	ग्व	ण्व	त्व	ध्व	स्व	ह्व
क्व	ग्व	ण्व	त्व	ध्व	स्व	ह्व

न-योगः।

क्न ख्न झ्न न्न स्न य्न
क्न ख्न झ्न न्न स्न य्न
श्न ह्न।
श्न ह्न।

म-योगः।

क्म ग्म ङ्म ट्म ण्म ध्म
क्म ग्म ङ्म ट्म ण्म ध्म
ल्म ह्म।
ल्म ह्म।

रेफ-योगः।

र्क् र्ख् र्च् र्ण् र्त् र्ध्
र्क् र्ख् र्च् र्ण् र्त् र्ध्
र्भ् र्श् र्ह्।
र्भ् र्श् र्ह्।

अनुस्वार-योगः।

कं	घं	जं	ढं	तं
कं	घं	जं	ढं	तं
नं	पं	हं।		
नं	पं	हं।		

विसर्ग-योगः।

कः	गः	पः	मः	सः।
कः	गः	पः	मः	सः।

विविध-योगाः।

क्क	ङ्क	ङ्ग	ङ्घ	ञ्च	ञ्छ	ञ्ज	ञ्झ
क्क	ङ्ख	ङ्ग	ञ्च	ङ्क	ङ्घ	ञ्ज	ञ्झ
ण्ट	ण्ठ	ण्ड	ण्ढ	न्त	न्थ	न्द	न्ध
ण्ट	ण्ठ	ण्ड	ण्ढ	न्त	न्थ	न्द	न्ध
म्प	म्फ	म्ब	व्भ।				
म्प	म्फ	म्ब	व्भ।				

ষ্ক	স্ক	ষ্খ	স্খ	শ্ব	স্ক্র	ষ্ট	ষ্ঠ
ক্ষ	স্ক	ষ্‌খ	স্খ	শ্চ	শ্ছ	ষ্ট	ষ্ঠ
স্ত	স্থ	ষ্প	স্প	ষ্ফ	স্ফ।		
স্ত	স্থ	ষ্প	স্প	ষ্ফ	স্ফ।		

ক্ক	ক্ষ্ণ	ক্ত	ক্‌থ	ক্ষ	গ্গ
ক্ক	ক্‌খ	ক্ত	ক্‌থ	ক্ষ	গ্‌গ
গ্দ	গ্ধ	গ্ভ	চ্চ	চ্ছ	জ্জ
গ্দ	গ্ধ	গ্‌ভ	চ্চ	চ্ছ	জ্জ
জ্ঝ	ঞ্চ	ট্ট	ড্ড	ত্ত	ত্ক
জ্ঝ	ঞ্চ	ট্ট	ড্ড	ত্ত	ত্‌ক
ত্প	ত্স	ত্ব	দ্গ	দ্ব	দ্দ
ত্‌পং	ত্‌স	ত্ব	দ্গ	দ্ব	দ্দ
দ্ভ	দ্ব	দ্ম	ন্ত	প্প	প্স
দ্ধ	দ্ব	দ্ভ	প্ত	প্প	প্স

ज्ञ	ब्ध	ल्क	ल्ग	ल्व	ल्म
ज्ञ	द्ध	ल्क	ल्ग	ल्व	ल्म
ङ्क्ष	ङ्ग	न्य	न्य	म्य	ल्क्ष्य
ङ्क्ष्य	ङ्ग्य	न्त्य	न्य्य	म्य्य	ल्क्ष्य
ष्ट्य	च्य	ज्ञ्य	त्म्य	च्य	त्स्य
ष्ट्य	त्य	द्ध्य	थ्य	क्ष्य	त्स्थ्य
च्य्र	ल्य	त्र	च्च	ल्ल	न्द्र
ज्र्य	ल्र्य	क्त्र	त्त्र	ल्त्र	न्द्र
म्र	त्म्य	न्य	स्य	त्र	च्च
त्र	त्स्थ्य	ल्र्य	स्र्य	क्त्र	त्त्र
क्ष्र	न्व	न्द्र	म्र	ष्क्र	ष्ट्र
च्छ्र	ल्त्र	न्द्र	स्त्र	क्र	ष्ट्र
ष्म्र	ङ्ग्र	म्र	त्म।		
प्र	त्र	स्प्र	त्प्र।		

त्व क्व क्ष्व ज्व त्व
त्व क्व च्छ्व ज्ज त्व
ह्व ह्व न्व ग्ध्व म्व
द्व द्व त्व ङ्ख्व ण्ड्व
स्त्व ष्ठ्व क्ष्म।
स्त्व ष्ठ्व क्ष्म।

र्च र्ज्ज र्द्ध र्य्य र्ष्व।
र्च्च र्ज्ज र्द्ध र्य्य र्ष्व।

---

१ २ ३ ४ ५ ६ ७ ८ ९ १०।
१ २ ३ ४ ५ ६ ७ ८ ९ १०।

द्वितीयः परिच्छेदः ।

प्रथमः पाठः ।

अजः, ईशः, ईषत्, उभयः, ऋणः, पक्वः, ओजः, औषधम्, अचलः, इतरः, दशनः, शमनः, तड़ागः, गमनम्, उदरम्, आकरः, अटलः, खनकः, ओदनः, मलयजः, नरवरः, घनतरः, आगमनम्, नदजलम्, तपनकरः, हलखननम्, विकसितः, विराजितः, समुदितः, विधूदयः, ऋणशोधः, दिवाकरः ।

द्वितीयः पाठः ।

मुग्धः, सुप्तः, सिक्तः, शुक्लः, वृक्षः, सङ्गतिः, उच्छेदः, वज्रम्, विषमः, कण्टकः, उद्गारः, उत्थितः, उद्भवः, विद्वान्, शर्करा, तस्करः, ब्राह्मणः, उद्दीप्तः, उज्ज्वलम्, प्रश्रयः, पूर्व्वाह्णः, आत्मीयः, उत्पत्तिः, सद्भावः, मृन्मयः, उत्फुल्लः, अस्त्रशस्त्रम्, उद्बोधनम्, भयविह्वलः, उद्वेलितः, उत्कण्ठा, उद्भासितः, उच्छेदार्हः, धर्म्मतत्त्वम्, मृन्मयम्, सुहृद्गुणः, धर्म्मतत्त्वम् ।

तृतीयः पाठः ।

(सविशेषणानि पदानि) ।

वन्दनीयः परमेश्वरः ।	मधुरं पयः ।
उदितः मित्रः ।	भयविह्वलं मनः ।
गुणज्ञः नरपतिः ।	आयते अक्षिणी ।
प्रसन्नः आत्मा ।	रमणीयानि पल्लवानि ।
परभृतः कोकिलः ।	प्रतिपालितानि अपत्यानि ।
मनोज्ञः चन्द्रः ।	भूपतितानि फलानि ।
लालितः पुत्रः ।	कुसुमिता लता ।
शुभः पन्थाः ।	गुणवती रमणी ।
अकपटः साधुजनः ।	स्नेहवती जननी ।
दयार्थिनः भिक्षवः ।	सवत्सा धेनुः ।
कनीयान् सहोदरः ।	जलमग्ना नौः ।
निष्पापाः ऋषयः ।	स्थविरा जननी ।
आगतं मित्रम् ।	आगता प्रावृट् ।
पूर्वं स्थानम् ।	प्रियाः गिरः ।

राजभक्ताः प्रजाः। | चतस्रः अप्सरसः।
त्रीणि अक्षीणि। | दश दिशः।
चित्रः शक्तयः। | विंशतिः पुस्तकानि।

शतं द्विजाः।

तृतीयः परिच्छेदः।

प्रथमः पाठः।

(प्रथमा-योगः)।

ईश्वरः अस्ति। | बालकौ पठतः।
वायुर्वाति। | साधू पश्यतः।
दिवाकरः प्रकाशते। | रामश्यामौ स्नास्यतः।
शिशुः जागर्त्ति। | दिवसाः यान्ति।
गायको गायति। | वयम् पश्यामः।
रामः समागतः। | बालाः आगच्छन्ति।
चौरो बिभेति। | योधाः यास्यन्ति।
आगच्छ भो देवदासः। | विहागः शब्दायन्ते।

पत्राणि विचलन्ति ।
नक्षत्राणि विराजन्ते ।
कुसुमानि शोभन्ते ।
पीड़ा वर्द्धते ।
दशरथ इति नृपतिरासीत् ।
शशीव शोभते शिशुमुखम् ।

द्वितीयः पाठः ।

(द्वितीया-योगः) ।

अहं चन्द्रं पश्यामि ।
त्वां धर्म्मकर्म्मनिरतां जानामि ।
हरिः वैकुण्ठमधिशेते ।
कैलासमुपवसति हरः ।
विषं भुंक्ते देवदासः ।
ग्रामं गच्छन् वृक्षमूलमुपवसति ।
धिक् देवदत्तम् ।
मेदिनीं परितः सागराः ।
कृष्णमुभयतः गोपाः ।
विद्यां विना वृथा जीवनम् ।
पत्युश्चित्तमनुवर्त्तते भार्य्या ।
गङ्गां निकषा वाराणसी वर्त्तते ।
यावत् समुद्रं विद्यते भागीरथी ।
अध्ययनमृते विद्या न भवति ।
अममन्तरेण सुखं न भवति ।
उपवनं दक्षिणेन कलरव इव श्रूयते ।
दीनः धनिनं याचते ।
शिष्यो गुरुं शास्त्रं पृच्छति ।

तृतीयः पाठः ।

(तृतीया-योगः) ।

यादवः करेण कुसुमान्याहरति ।
रामः सीतया लक्ष्मणेन च सह वनं जगाम ।
यः शोकेनाभिभूतः अलं तस्य विद्यया ।
अलं महीपाल तव श्रमेण ।
जटाभिस्तापसमहं पश्यामि ।
सुकृतिफलेन हरिमहं द्रक्ष्यामि ।
बुद्धिमता मासेन व्याकरणमधीतम् ।
किं कुलेन विशालेन गुणैर्हीनस्तु यो नरः ।
श्रमेण विना विद्या न भवति ।
विना रामेण कोऽन्यः दशकण्ठं विनाशयिष्यति ।
सर्व्वेषामेव धनेन प्रयोजनम् अस्ति ।
य एव हि परिश्रान्तः सुखेन स्वपिति स हि ।
यत्नेन लिखिता तेन पत्रिका पितरं प्रति ।
धरायां विद्यया तुल्यं धनं नास्ति ।

चतुर्थः पाठः ।

(चतुर्थी-योगः) ।

यो दरिद्राय धनं ददाति स हि पुण्यं लभते ।
यो गुरवे अनृतं निवेदयति तमहं तृणाय मन्ये ।
पिपासायै जलं अवश्यमेव पातव्यम् ।
यः प्रतिवेशिने ईर्ष्यति स कदापि सुखं न लभते ।
मोदकः शिशवे रोचते ।
रामः हरये सहस्रं धारयति ।
भक्तिर्ज्ञानाय कल्पते ।
रोगिणे औषधमाहरति ।
नमो भगवते विश्वपालनाय ।
मुनिभ्यो हि हितं तपः ।
फलेभ्यः काननं याहि ।
साधूनां धनार्ज्जनं दानाय ; नतु परपीड़नाय ।

पञ्चमः पाठः ।

(पञ्चमी-योगः) ।

धावतः अश्वात् पतति ।
आसनात् पश्यति गुरुः ।
धनाद्विद्या गरीयसी ।
रामो बाल्यात् प्रभृति गुरुभक्तिपरायणः ।
जन्मनः प्रभृति सेव्यतां हरिः ।
कोऽपि श्रमाद्दते सुखं न लभेत ।
कौशल्या पुत्रशोकात् भृशं रुरोद ।
मित्रादन्यः कः परित्रातुं समर्थः ।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
सन्तोषाद्विना सुखं न उत्पद्यते ।
हिमवतो गङ्गा प्रभवति ।
दरिद्रः नृपाद्धनं गच्छति ।
मया श्रुतमिदं तातात् ।
व्याघ्रात् गां रक्षति गोपः ।
अन्तेवासिनः आचार्य्यादुपदेशं गच्छन्ति ।

चिकित्सकादन्यः को मां रोगात् त्रातुं शक्नोति ।
आशैशवात् शोभनं समाचर ।
परपदसेवायाः कष्टतरं किमपि नास्ति ।
विद्यते हि ग्रामादहिर्मनोरमसुपवनम् ।
पतन्ति पत्र-पुष्पाणि महतोऽस्मान्महीरुहात् ।
सङ्गः आचारेभ्यो न सज्जनाः स्खलन्ति क्वचित् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ।

षष्ठः पाठः ।

(षष्ठी-योगः) ।

मानवानां धर्म्म एव भूषणम् ।
सन्तोष एव सर्व्वेषामवलम्बनीयः ।
यः अल्पस्य हेतोर्बहुहातुमिच्छति स मूढः ।
माता पुत्रस्य स्मरति दयते च सा ।
सज्जनानां सम्मतोऽयं पन्थाः ।
चन्द्रो मम द्रष्टव्यस्तस्य समं रमणीयं किमपि न विद्यते ।

सत्यार्थवक्ता नरकस्य जिष्णुः।
अश्वगानां धावन्तः शीघ्रगामिनः।
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
दुर्बलस्य बलं राजा, शक्तानां भूषणं क्षमा।
हस्तस्य भूषणं दानं, सत्यं कण्ठस्य भूषणम्।
साधूनां दर्शनं पुण्यं, कः परः प्रियवादिनाम्।

सप्तमः पाठः।

(सप्तमी-योगः)।

शिल्पे निपुणः परसेवां नैव करोति।
ध्रुवो बाल्ये वयस्येव परमेश्वरं भेजे।
उदिते भास्करे नैशं तमः पलायते।
चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।
स्नामो वयं वारिनिधौ निशान्ते।
वास्यति दक्षिणो वायुर्वसन्ते सुखमागते।
समुदितेऽरुणे ह्येव प्रभाते स्नास्यथो युवाम्।
रोदित्येष शिशुः रात्रौ ज्येष्ठे भ्रातरि प्रस्थिते।
नरेषु सज्जनः पूज्यः कथितः सुजनैः सदा।

तृतीयः परिच्छेदः।

Translate into Sanskrit :—

(a) দুর্ব্বল, মূর্খ, পুত্র, বালক, তুরঙ্গ, স্বভাব, বায়ু, দুর্ব্বল লোক, সুন্দর ছেলে, বীরপুরুষ, ধূর্ত্তশৃগাল, মত্তগজ, সাধুর দয়া, রামের ক্ষমা, বিনয় গুণ, প্রখর কিরণ, রমণীয় সময়, হংসসারস, দশরথের পুত্র, পাণ্ডবের সখা।

(b) Full moon. Pleasant day. Eldest boy. Some trees. An old man. Hari's feet. A handsome boy. A brave boy. A deaf boy. A weak man. A kind hearted man. The house of the preceptor. A difficult question. The right hand. The left hand. Ram and Hari. The high trees on the mountain. Krishna is the friend of the Pandabas. Waves of the sea. In old age. Drops of water. In damp soils. An obedient boy. The strength of the men. The elder brother. Pen and inkpot. Father and mother. With sweet words. An empty house. In the house. In the beautiful city. It is a very auspicious day.

Correct :—

साधुस्य पुत्रः, वायुस्य वेगः, मूर्खः बालकाः, विद्वानस्य वाक्यः, मूर्खस्य स्वभावम्, कतिपये बालकः, भीषणं व्याघ्रः, रमनीयः गृहः, दुःखस्य कारणः, कृपणस्य धनः, प्रष्फुटितं कुसुमानि, सफलं जन्मम्, राजस्य यशम्,

जगतस्य पिता, दुःखितः मनः, हरेः पुस्तकः, सिंहस्य बलः, गभीरः वनम्, अर्थस्य गौरवः, नवः वस्त्रः, शून्यः वासगृहः, मधुरः वचनः । कुसुमस्य सौरभः, पुस्तकस्य मूल्यः, महद्दुःखः, पवित्रं धामम्, निर्म्मलं चेतम्, पयसः पानः ।

चतुर्थः परिच्छेदः ।

दया हि परमो धर्म्मः ।

भ्रातः ! अत्र बहवो निराश्रया दीनाः सन्ति । तेषां केचित् कुटीरे, केचित् वृक्षमूले, केचित् पथप्रान्ते वा तिष्ठन्ति । अहोवत ! अनाहारेणैषां शरीराणि विशीर्णान्यस्थिचर्म्मावशिष्टानि जातानि । अहं मन्ये यदानाहारादधिकं दुःखकरं जगति किमपि नास्ति । आगच्छत, सर्व्वे वयं मिलित्वा स्वाहारात् किञ्चित् किञ्चिदुद्धृत्य एभ्यो दद्मः । एतेन तेषां महान् उपकारो भविष्यति । जगदीश्वरोऽस्माकञ्च मङ्गलं विधास्यति । दया हि परमो धर्म्मः, अस्मादधिकतरं परिणामसुखावहं जगति किमपि नास्ति । अतः सर्व्वैरेव दयालुभिर्भवितव्यम् ।

द्वयोः बालकयोः संलापः ।

१म बालकः । आगच्छतु सखे ! चिराद् दृष्टोऽसि । इदमासनम्, इह निषीद ।

२य बालकः । (उपविश्य) कथं त्वमुत्कण्ठित इव लक्ष्यसे ?

१म बालकः । विद्यालयगमनस्य कालो मे समागतः । अतो मे उत्कण्ठा जाता ।

२य बालकः । कस्मिन् विद्यालये त्वमधीषे ?

१म बालकः । राजकीयसंस्कृतविद्यालये ।

२य बालकः । किं पठसि ?

१म बालकः । काव्यशास्त्रम् ।

२य बालकः । बह्वनि काव्यानि सन्ति । तेषु कतमत् पठ्यते ?

१म बालकः । रघुवंशाख्यं महाकाव्यम् ।

२य बालकः । केनेदं प्रणीतम् ।

१म बालकः । अपि न ज्ञायते केनेदं प्रणीतमिति ? इदं खलु महाकवेः कालिदासस्य कृतिः ।

२य बालकः । काव्यशास्त्राध्ययनार्थिनः कतिपये छात्रास्तत्र विद्यन्ते ।

१म बालकः। सन्ति तत्र पञ्चविंशतिः विद्यार्थिनः।

२य बालकः। कानि तत्र शास्त्राणि अध्याप्यन्ते ?

१म बालकः। काव्यव्याकरणालङ्कारदर्शनस्मृतय ।

२य बालकः। काव्यशास्त्रस्याध्ययनेन किं फलं भवति ?

१म बालकः। काव्येनाधीतेन सुकुमारमतीनां सुखेनैव धर्म्मार्थकाममोक्षाणां प्राप्तिर्भवति।

२य बालकः। अहो! महाफलोपधायकं काव्यशास्त्रं अतः सर्व्वेषामेवैतदध्ययने यत्नः करणीयः। अद्य प्रभृति अहमपि काव्यशास्त्राध्ययनाय यतिष्ये। त्वया सह कथोपकथनेनाद्य मे महान् उपकारः सञ्जातः! आशंसन्तु देवाः यथाचिरेणैव मे मनोरथः सफलः स्यादिति।

मा विस्मर कृपासिन्धुं
दीनबन्धुं जगत्पतिम् ।

यो भगवति भक्तिं करोति, स चिराय सुखेन कालमतिवाहयति। तस्य कदापि दुर्गतिर्न जायते। ईश्वरः सर्व्वेषु मातेव स्निह्यति पालयति च सर्व्वान् पितेव। स सज्जनानां करुणविलापं शृणोति। सर्व्वेषामन्तर्निहितान् विषयान् अपि जानाति। सर्व्वस्य सर्व्वाणि दुःखानि च हरति। तस्येच्छया वायुर्वाति, नद्यो वहन्ति, वृक्षाः फलन्ति, सूर्य्यस्तपति, चन्द्र उदेति। किं बहुना सर्व्वाणि कार्य्याणि ईश्वरेच्छया भवन्ति। वयं तस्य दयां प्रतिक्षणमनुभवामः। तं न कदापि विस्मरामः। सर्व्वैरेव तस्यादेशः पालनीयः।

लोभः।

लोभो हि महान् शत्रुर्भवति। अपि तु स क्रमशोऽभिवर्द्धते। लोभोपहतचेतसः विगर्हितानि कार्य्याणि कुर्व्वन्ति। लोभोपहतो गुरुजनमपि अवमन्यते। स धनार्ज्जनक्लेशमेव सहते, नतु तदुपभोगसुखम्। किम-

धिकेन अन्यदीयसौभाग्यदर्शनेन ईर्ष्यया स दह्यते। उक्तञ्च—

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।
तृष्णार्त्तो दुःखमाप्नोति परत्रेह च मानवः॥

लोभस्य प्रभावोपवर्णने केऽपि न समर्थाः। प्रभावमस्यावलोकय—

सर्व्वा एवापदस्तस्य यस्य लुब्धं हि मानसम्।
सर्व्वाः सम्पत्तयस्तस्य अलुब्धं यस्य मानसम्॥

नहि सत्यात् परो धर्म्मः।

सदा सत्यं ब्रूयात्। सर्व्वे सत्यवादिनमाद्रियन्ते। तस्य वचसि विश्वासं कुर्व्वन्ति च। सत्यात्परो धर्मो न विद्यते। यः सदा सत्यं वदति परमेश्वरस्तमनुगृह्णाति। परमेश्वरकृपया सत्यवादिनः सर्व्वा विपत्तयः सुदूरं पलायन्ते। शान्तनुसुतो भीष्मः सत्यपालनानुरोधादेव चिरकौमारव्रतमुदयापयामास। युधिष्ठिरश्च सत्यबलेन सख्यभावेन श्रीकृष्णं वशीकृत्य दुर्ज्जयान् कौरवान् परा-

जितवान्। महाराजो दशरथः सत्यपालनाय प्राणप्रतिमं सुतं वने प्रेरयन् जीवनं तत्याज। तथापि सत्यात्पदमपि विचलितो नाभूत्। किं बहुना सत्यवादी मृत्योरनन्तरं सुखकरं स्वर्गलोकमवाप्नोति।

मिथ्यावादी इह परस्मिन् लोके च महद्दुःखमवाप्नोति। तस्य वचसि केऽपि न विश्वासं कुर्व्वन्ति। तस्य सत्यामपि वाचं मिथ्या इव मन्यन्ते। न केऽपि तस्य विपदुद्धरणाय यतन्ते। स सुखेन संसारयात्रामपि निर्व्वाहयितुं न समर्थः। पदे पदे विपदमाप्नोति च। अतएव सर्व्वेषामेव सत्यकथनाय यत्नः कर्त्तव्यः।

यज्ञदत्तदृढ़व्रतयोः कथोपकथनम्।

यज्ञदत्तः—सखे! स्वागतं इदमासनमलङ्करोतु परिग्रहेण।

दृढ़व्रतः—अलमलमत्यादरेण। अयमहमुपविशामि।

यज्ञदत्तः—भ्रातः! कथमध्ययनवेलायामत्रागतः? म्लानमिव ते मुखकमलं परिलक्ष्यते। अपि कुशलं ते उपाध्यायस्य?

दृढ़व्रतः—अथ किम्! कुशलेन वर्त्तते पूज्यपाद उपाध्यायः।

यज्ञदत्तः—अपीदानीमविघ्नं त्वदध्ययनं ? तच्छ्रवणोत्-सुकमधुना मे हृदयम्।

दृढ़व्रतः—नास्ति सुहृज्जनेषु किमपि गोप्यं नाम। कथ्यते दैन्यकारणम्। परमज्ञानी मे गुरुः नित्यमेव मठे छात्रानध्यापयन्नास्ते। तथापि मे अध्ययनप्रत्यूहो जातः।

यज्ञदत्तः—तव उपाध्यायः परमज्ञानी। नित्यमध्यापयति च ; तथापि कथमध्ययनविघ्नः सञ्जातः ?

दृढ़व्रतः—गतान्यद्य कतिपयान्यहानि कश्चिद्ब्राह्मण-कुमारोऽध्ययनार्थमत्र मठे समायातः।

यज्ञदत्तः—ततस्ततः ?

दृढ़व्रतः—स कुमारः निविष्टेन मनसा गुरूपदेशं शृणोति। अहं कथमपि तेन सह पठितुं न शक्नोमि। गुरुस्तस्मिन् समधिकं स्निह्यति। एतदेव मे दैन्यकारणम्।

यज्ञदत्तः—नास्ति गुरोः कस्मिन्नपि पक्षपातः। वितरति गुरुः ज्ञानं यथा प्राज्ञे तथैव दुर्मेधसि। भक्ति-रेव गुरुजनमनसि प्रीतिं जनयति। श्रमेणानु-रागेण च अचिरादेव साफल्यं लप्स्यसे।

क्रोधः ।

क्रोधो हि महान् शत्रुः । नास्त्यत्र जगन्मण्डले क्रोधसमो रिपुः । योऽहि क्रोधं संहरते स एव हि पण्डितख्यातिं लभते । न सन्त्यत्र दुष्कार्य्याणि यानि क्रोधपरवशः कर्त्तुं न शक्नुयात् । क्रुद्धो हि परुषया वाचा अर्चनीयानपि अवमन्यते । तस्य कर्त्तव्याकर्त्तव्यविचारो नास्ति । किमधिकेन क्रोधवशादात्मानमपि यमसदनं नयति । क्रोधपरवशः सन्तोषामृतं कदापि न लभेत । अतो यः आत्मनः सुखमन्विच्छेत् स हि यत्नेन क्रोधं वर्ज्जयेत् । यः कुपितं प्रति न क्रुध्यति अपि तु सुमधुरेण वचसा प्रसादयति स एव तं वशमानेतुं समर्थः । क्षमावन्तः इह परत्र च सुखं लभन्ते ।

क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ॥

विद्या ।

विद्या हि परमं धनम्। धनेनानेन सदृशं किमपि नास्तीह जगति। दस्युतस्करादिभिरेतदपहर्त्तुं न शक्यते। दानेन च क्षयं नैति। विद्याहीनो जनः रूपयौवनैश्वर्य्यादिभिरलङ्कृतः सद्वंशोत्पन्नोऽपि निर्गन्धकिंशुक इव न शोभते। विद्याप्रभावेण कालिदासादयः संस्कृतभाषया बह्वनि काव्यानि प्रणीयामरत्वं लेभिरे। राजा स्वदेशे एव पूज्यते अपि तु विद्वान् सर्व्वत्रैवार्हणां लभते। विद्याप्रभावेण मानवैः शिल्पयन्त्रादिकं विनिर्मितं भवति किं बहुना विद्या विदेशगमने बन्धुरिव अनुकूलयति। यस्यैतद्धनं नास्ति जगतीतले स एव महादरिद्रः। मूर्खोऽयं इत्युक्ता सर्व्वे तम् अवजानन्ति। अतः सर्व्वैरेव विद्योपार्ज्जनार्थं यत्नः करणीयः।

अबोधः सेवको मरणाय ।

आसीत् पशुप्रियो नाम कश्चिद् राजा। अभूच्च तस्य मन्दमतिर्नाम सेवको वानरः। एकदा निद्रां गतस्य नृपतेर्वक्षःस्थलोपरि काचिन् मक्षिका उपविष्टा। तेन मुहुर्मुहुः व्यजनेन निषिध्यमानापि सा पुनः पुनः तत्रैव उपविशति।

ततस्तेन मूर्खेण कपिना कुपितेन शितास्त्रमादाय तस्या उपरि प्रहारः कृतः। तत मक्षिका उड्डीय शून्ये लीना। तेन तीक्ष्णधारेण खड्गेन राज्ञो वक्त्रो द्विधा छिन्नम्। राजा च तत्क्षणादेव पञ्चत्वं गतः।

ईश्वरचन्द्र-विद्यासागरः।

कतिपयानि वर्षाण्यतिवाहितानि, मेदिनीपुरप्रदेशान्तर्गतवीरसिंहाख्ये जनपदे दयासागरः स्वनामधन्योऽशेषविद्याविनयालङ्कृतः ईश्वरचन्द्र विद्यासागरः जन्म परिजग्राह। स महाभागो व्याकरणसाहित्यालङ्कारदर्शनस्मृत्यादिषु शास्त्रेषु अतीव नैपुण्यं प्रदर्श्य विद्यासागर इत्युपाधिं प्राप्तवान्। तदानीं तत्समः कश्चित् पण्डितो नासीत्। महाभागस्य तस्य विविधासु विद्यासु पारदर्शितामवलोक्य भारतीयाः सर्व्वे एव निरतिशयं विस्मयं प्रापुः।

स महाभागः कन्यापि पुत्रवत् पालनीया, यत्नतः शिक्षणीयेति निदेशं शास्त्रकाराणामनुस्मृत्य, स्त्रीशिक्षोन्नतिविधानार्थं यत्नपरश्चासीत्। बालविधवानां दुःखं समवलोक्य शास्त्रीयविधीन् सङ्कलय्य विधवाविवाहप्रच-

लनाय पुस्तकमेकं प्रणीय परमानन्दं प्राप। तेन वङ्ग-भाषोन्नयिसाधनाय अतुलनीयो यत्नः परिश्रमश्च कृतः।

तस्येताद्दशं यशः यत् सः "सि, आइ, इ" इत्युपाधिमपि प्राप्तवान्। भो बालकाः! यूयम् विद्यासागर इव विद्यालाभाय यत्नं परिश्रमञ्च कुरुत; यत्प्रभावेण चिरसुखिनो यशस्विनश्च भविष्यथ।

सत्यसन्धदृढ़व्रतयोः संलापः।

सत्यसन्धः। एह्येहि भोः दृढ़व्रत! इदमासनमलङ्क्रियतामुपवेशनेन। चिरादृष्टोऽसि। अपि कुशलं ते? न जाने त्वद्भवनस्य कामपि वार्त्ताम्?

दृढ़व्रतः। सत्यसन्ध! किं बहुना भवदनुग्रहेण सर्व्वेषामेव कुशलम्। कः पुनर्निष्ठुरो व्याधिर्जहार ते शरीरसौन्दर्य्यम्? क्षीणतरस्त्वद्देहोऽतिमात्रं दुःखं जनयति।

सत्यसन्धः। भो दृढ़व्रत! शिरःपीड़ा हि अतिमात्रं मां बाधते। कुतस्तावत् रोगातुरस्य शरीरप्रकर्षः?

दृढ़व्रतः। अहो बलवान् खलु रोगाणां प्रभावः। हरति निमेषादेव सर्व्वेषां संसारसुखम्।

सत्यसन्धः। भगवता निष्ठुराशयाः सृष्टाः। येन ममायं दशाविपाकः।

दृढ़व्रतः। नहि नहि रोगाः भगवत्सृष्टाः। अमितचाराः निखिलांश्च रोगान् जनयन्ति।

तथा उच्यते—"रोगशोकपरीतापबन्धनव्यसनानि च।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्।"

को नामापराधस्ते सर्व्वसुखविनाशकस्य आयुःक्षयकरस्य च रोगस्य कारणम्।

सत्यसन्धः। सर्व्वदा कार्य्यनिरतश्चाहम्। न जाने किन्तावद्रोगस्य कारणमिति।

दृढ़व्रतः। व्यायामादेवाहं लब्धवान् देहोपचयं व्याधयश्च मां विहाय सुदूरं प्रपलायिताः। न जानीहि व्यायाम एव निदानन्तावन्मम बलोपचयस्य।

सत्यसन्धः। (साश्चर्य्यम्) किमुच्यते? व्यायामादेव त्वयाधिगतः शरीरप्रकर्षः? व्यायामेन किमपक्रियते शरीरजाड्यम्?

दृढ़व्रतः। अथकिम्। व्यायामशीलो हि शतायुर्भवति। सुनिद्राजनितं परमानन्दं लभते च। किं

বহুনা যথাকালং প্রবুধ্য যো ব্যাযামমাচরতি, সারবৎ বস্তু অশ্নাতি চ সোঽবশ্যমেব চিরায় স্বাস্থ্যসুখং লভতে।

চতুর্থঃ পরিচ্ছেদঃ।

Translate into Sanskrit :—

(*a*) রাম দেখিতেছে, হরি গ্রামে যাইতেছে, যাদব হাসিতেছে, বালককে দেখ, এখানে এস, সত্য বল, শশী চন্দ্র দেখিতেছে, শ্যাম তাহার পিতা, বালকেরা পুস্তক পড়িতেছে, ছাত্রেরা বিদ্যালয়ে যাইতেছে, তাহার ছেলেরা সর্ব্বদা সত্য বলে, ঈশ্বর সকলকে পালন করেন, তুমি কবে বাড়ী যাইবে, মেঘ হইতে বৃষ্টি হয়, শ্রম বিনা বিদ্যা হয় না, ধনে প্রয়োজন নাই, রোগীর জন্য ঔষধ আনিতেছে, আমি রামের নিকট শুনিয়াছি।

(b) Hari goes. The sun rises. The boy reads. Rama sees. The sun shines. Madhu sings sweetly. Shashi laughs loudly. Jadava comes from school. The boys play here. Friend! this is my house. What is your name? He came one day to see me. He gave me a book. Birds live in trees. Madhaba sees him with one eye.

I came late. The boy came here. The boy will play with the dog. They went to see. May you be happy. To see the moon is pleasant. Take your seat please. How bright is the sun! May God bless you! Men should not be liars. He is very cheerful. To work is healthy. It was published. He sleeps soundly. In his old age he became weak. Will you do? Are the flowers pretty? Are you hungry? Is the boy blind? Anger is a sort of madness. He loves to walk. A good man is always happy. Bring some water here. A deer was shot by an arrow. I can't say where he is. Who are you? Which man is rich?

Corrcet :—ईश्वरो मां रक्षसि। सर्व्वे जनाः तन्नपश्यति। भिक्षुकं अन्नं देहि। अरण्यं जनैः शून्यः। रामः सत्वरं गच्छन्ति। दुर्ज्जनस्य सह मा गच्छ। अहं रामं पुस्तकं ददामि। मम सह त्वं आगच्छतु, सर्व्वे भवतु सुखिनः। रामो पुरा राजा बभूव।

———

गुरुभक्तिः ।

यः शिष्याय एकमपि अक्षरमुपदिशति स एव गुरुः । प्रश्रयावनतचेतसा तस्मिन् अनुरागप्रदर्शनमेव कर्त्तव्यम् । सर्व्वान्तःकरणेन मातापितराविव गुरुरर्च्चनीयः । अन्तेवासिनां सर्व्वेषामेव गुरुभक्तिप्रदर्शनं कर्त्तव्यम् । तस्माद्दृते अभिलषितसिद्धिर्न सम्भविष्यति । गुरुरेव ज्ञानाञ्जनशलाकया चक्षुरुन्मीलयति मानसं तमो नाशयति च ।

गुरुकृपां विना कोऽपि जनः ज्ञानरत्नमुपार्ज्जयितुं न शक्नोति । ज्ञानमन्तरेण कोऽपि धनानि लब्धुं न समर्थः । अतो गुरुकृपैव सर्व्वस्य मूलम् ।

एकमप्यक्षरं शिक्षयतः गुरोः ऋणादात्मानं मोचयितुं कोऽपि नार्हति । दोषान् विलोक्य क्षेमकामो गुरुर्यथापराधं शिष्यान् दण्डयति । अनुक्षणं तच्छासनप्रतिपालनं सुशिष्यस्य कर्त्तव्यम् । गुरुभक्तिविषयकमारुणेरुपाख्यानं सर्व्वैरेव स्मर्त्तव्यम् ।

आसीत् पुरा आयोधधौम्यनामा कश्चित् ऋषिः । तस्यारुणिर्नाम कश्चित् शिष्यो बभूव । अथैकदा स आरुणिम् आदिदेश "वत्स, गच्छ केदारं बधान" इति ।

आरुणिस्तु उपाध्यायेन समादिष्ट एव तत्र गत्वा महता यत्नेन केदारात् जलनिर्गमं रोद्धुं न शशाक। अथोपायान्तराभावेन स्वयमेव तत्र अशयिष्ट। अथ अस्तं गतेऽपि सवितरि तमारुणिमनागतमवलोक्य गुरुः शिष्यान् पप्रच्छ आरुणिः कुत्र गतः? कथमधुनापि नायातः इति। ते प्रोचुः यत् भवान् एव केदारखण्डबन्धनाय आरुणिमादिशदिति। ततस्तु सशिष्य आयोधधौम्यस्तत्रागम्य तारस्वरेण उक्तवान् भो आरुणे क्वासि त्व मिति? सः समाकर्ण्य उपाध्यायस्याह्वानम् सहसा तस्मादुत्थाय स्वयमेवोपतस्थे। सः गुरुं नमस्कृत्योवाच उदकं निरोद्धुमक्षमोऽहं स्वयमेवात्र संविष्टः।

ध्रुवोपाख्यानम्।

आसीत् पुरा उत्तानपादो नाम कश्चित् राजा। तस्य सुरुचि-सुनीतिनामधेये द्वे भार्ये आस्ताम्। सुरुच्यां सविशेषं स्निह्यति राज्ञो हृदयम्। महात्मनस्तस्य सुरुच्यामुत्तमनामा, सुनीतौ च ध्रुवाभिधेयः सुतो जातः। नृपतिस्तु सुरुचिसुते समधिकप्रीतिमानासीत्।

अथैकदा ध्रुवः सिंहासनमधिनिष्ठतस्तस्य नृपतेरुत्सङ्गारोहणकामो बभूव। राजा तु सुरुचिमवलोक्य सुतमनोरथं न पूरयामास। सुरुचिस्तु पितुरुत्सङ्गारोहणकामं ध्रुवमवलोक्य सरोषमाह—हे पुत्रक! त्वं खल्पभाग्योऽसि। कथं त्वं नृपाङ्कमारोढ़ुम् इच्छसि इति।

विमात्रा एवमुक्तः सः कथमपि शोकं निगृह्य अश्रुसिक्तकपोलस्तस्मान्निष्क्रान्तः सर्व्वं मात्रे निवेदयामास। माता तु सर्व्वमाकर्ण्य पुत्रमुवाच—भोः पुत्रक! यत्ते पिता न प्राप तल्लाभाय सर्व्वात्मना यतस्वेति।

अथासौ पञ्चवर्षदेशीयो ध्रुवः तपसे सिंहव्याघ्रादिहिंस्रजन्तुसमाकुलं महारण्यं प्रविवेश। अथ स बालकः निविष्टेन चेतसा भगवन्तमाराध्य स्वनामख्यातं ध्रुवलोकमधिचकार।

सहसा विदधीत न क्रियाम्
अविवेकः परमापदां पदम् ।

अस्ति उज्जयिन्यां माधवो नाम विप्रः। तस्य ब्राह्मणी बालापत्यरक्षार्थं ब्राह्मणं गृहे अवस्थाप्य स्नातुं गता। अत्रान्तरे ब्राह्मणोऽपि भिक्षार्थं गृहान्निर्गन्तुमभिलषन् चिन्तयामास। बालकस्यात्र रक्षको नास्ति किं करोमि। आस्तां तावत्, चिरकालपालितमपत्यतुल्यं नकुलमसुम् बालकस्य रक्षायै नियोज्य अधुनैव गच्छामि। तथा कृत्वा नदीतटमुपगम्य पत्न्यै सर्वं विज्ञाप्य गतः।

अत्रान्तरे नकुलेन बालकसमीपमागच्छन्नेकः क्षुण-सर्पः व्यापादितः खण्डितश्च। ततो जलाशयादागच्छन्तीं ब्राह्मणीम् अवलोक्य नकुलो रुधिरलिप्तमुखः सत्वरमुपगम्य ब्राह्मण्याश्चरणान्तिके विलुण्ठितो बभूव। तथाविधं तं दृष्ट्वा नूनमनेन मे दारको भक्षितः इति निश्चित्य ब्राह्मणी कोपात् तस्योपरि जलकुम्भं चिक्षेप। स च पञ्चत्वं गतः।

अथ सा यावत् गृहमुपसृत्य पश्यति, तावत् बालकः अक्षतः सर्पश्च व्यापादितस्तिष्ठति। ततस्तमुपकारकं नकुलं निरीक्ष्य परं विषादम् उपगता।

———

पुनर्मूषिको भव ।

अस्ति गौतमस्य तपोवने महातपा नाम मुनिः । तत्र तेन मुनिना काकेन नीयमानः मूषिकशावको दृष्टः । ततः कृपालुना मुनिना स मूषिकशावकः काकात् रक्षितः नीवारकणैः संवर्द्धितश्च । ततो विड़ालस्तं मूषिकं खादितुमुपधावति । तमवलोक्य मूषिकस्तस्य मुनेरुत्सङ्गं प्रविवेश । सन्त्रस्तं तमवलोक्य मुनिनोक्तम्, मार्ज्जाराद्बिभेषि ; अतस्त्वं मार्ज्जारो भव । ततः स विड़ालः कुक्कुरं दृष्ट्वा पलायते, ततो मुनिना तपःप्रभावेण स कुक्कुरः कृतः । स च कुक्कुरः व्याघ्राद्बिभेति ततस्तेन मुनिना कुक्कुरः व्याघ्रः कृतः ।

अथ मुनिस्तं व्याघ्रमपि मूषिकनिर्व्विशेषं पश्यति । अथ तत्रत्याः सर्व्वे एव जनास्तं व्याघ्रं दृष्ट्वा "अनेन मुनिना मूषिकोऽयं व्याघ्रतां नीतः" इति वदन्ति । एतच्छ्रुत्वा स व्याघ्रो भृशं दुःखितोऽचिन्तयत् यावदनेन मुनिना जीवितव्यं तावदेव इदमकीर्त्तिकरं मम स्वरूपाख्यानं न यास्यति । व्याघ्र इति मनसि सम्प्रधार्य्य मुनिं हन्तुं समुद्यतः । मुनिना तपःप्रभावेण तस्य चिकीर्षितं ज्ञात्वा "पुनर्मूषिको भव" इत्युक्त्वा असौ मूषिक एव कृतः ।

नास्ति लोभात् परो रिपुः त्रिषु लोकेषु कश्चन ।

अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तोनाम ब्राह्मणः। तस्य च कृषिं कुर्व्वतः सदैव निष्फलः कालोऽतिवर्त्तते। अथैकदा स ब्राह्मणः निदाघकालस्यापराह्णे धर्म्मार्त्तः स्वक्षेत्रमधेय विश्रामार्थं वृक्षच्छायायां उपविष्टः। ततस्तु स अनतिदूरे स्वक्षेत्रमधेय वृक्षच्छायायां भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास। नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता। तेनेदं मे कृषिकर्म्म विफलीभवति। तदस्या अहं पूजां करिष्यामि। इत्यवधार्य्य कुतोऽपि क्षीरं याचित्वा शरावे निधाय वल्मीकान्तिकमुपगम्य उवाच।—भोः क्षेत्रपाल मया भाग्यदोषात् एतावन्तं कालं न ज्ञातं यत्त्वमत्र वर्त्तसे। तेन पूजा न कृता। तत् साम्प्रतं क्षमस्व माम् इत्युक्त्वा दुग्धं निवेद्य गृहाभिमुखं प्रायात्। अथ प्रातर्यावदागत्य पश्यति तावद्दीनारमेकं शरावे दृष्टवान्। - एवं प्रतिदिनमेकाकी तत्रागत्य तस्मै क्षीरं ददाति एकैकं दीनारञ्च गृह्णाति।

अथैकस्मिन् दिवसे वल्मीके क्षीरनयनाय पुत्रं नियोज्य ब्राह्मणः ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा शरावे संस्थाप्य च पुनर्गृहं समागतः दिनान्तरे तत्र गत्वा दीनारमेकं गृहीत्वा चिन्तितवान्—नूनं सौवर्णदीनारपूर्णोऽयं वल्मीकः। तदेनं हत्वा सर्व्वमेकवारं ग्रहीष्यामि। इत्येवं मनसि सम्प्रधार्य्य अन्येद्युः क्षीरं ददता ब्राह्मणपुत्रेण सर्पो लगुडेन शिरसि ताड़ितः। ततः कथमपि दैववशात् असृक्जीवित एव रोषात् तमेव तीव्रविषदशनेन तथा अदशत् यथा सद्य एव पञ्चत्वमुपागतः। स्वजनैश्च क्षेत्रस्य नात्तिदूरे काष्ठसंचयैः सत्कृतः।

वरं बुद्धिः न वै विद्या, विद्याया बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः॥

कस्मिंश्चिदधिष्ठाने चत्वारो राजपुत्राः परस्परं मित्रत्वमुपागताः निवसन्ति स्म। तेषां त्रयः शास्त्रज्ञाः परन्तु बुद्धिरहिताः। एकस्तु बुद्धिमान् परन्तु शास्त्रपराङ्मुखः। अथ तैः कदाचिन्मिथः मन्त्रितम्। को गुणो विद्यया यदि

देशान्तरं गत्वा अर्थोपार्ज्जनं न क्रियते। तत् सर्व्वे वयं देशान्तरं गच्छामः।

अथ कियद्दूरं गत्वा तेषां ज्येष्ठः प्राह—अहो, अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान्। विद्यामन्तरेण केवलया बुद्ध्या धनं न लभ्यते। तन्न अस्मै स्वोपार्ज्जितं दास्यामि। तदेष गृहं गच्छतु। ततो द्वितीयेनाभिहितं—भोः सुबुद्धे गच्छ त्वं स्वगृहं, यतस्ते विद्या नास्ति। ततस्तृतीयेनाभिहितं—अहो न युज्यते एवं कर्त्तुं यतो वयं बाल्यात् प्रभृति एकत्र क्रीड़िताः। तदागच्छतु एषः; अस्मदुपार्ज्जितस्य वित्तस्य समभागो भविष्यति। तथानुष्ठिते गच्छन्तस्ते वर्त्मनि मृतसिंहास्थीनि दृष्टानि। ततश्चैकेनाभिहितं—अहो! अद्य अधीतविद्याया याथार्थ्यं परीक्षितव्यम्। कश्चिदेष प्राणी मृतस्तिष्ठति, विद्याप्रभावेण जीवयाम एनम्। अहं तावदस्थिसञ्चयं करोमि। ततः एकेनास्थिसञ्चयः श्रीत्सुक्येन कृतः। द्वितीयेन चर्म्ममांसरुधिरं संयोजितम्। कृतोयोऽपि यावत् जीवनं संयोजयितुम् उद्युक्तः तावत् स बुद्धिमता निषिद्धः। उक्तश्च तेन, एष सिंहः; यदेनं सजीवं करिष्यसि ततः सर्व्वानपि व्यापादयिष्यति। बुद्धिमता इत्यभिहितः स आह धिङ् मूर्खं नाहं विद्यां विफलतां

নয়ামি। তদনন্তরং বুদ্ধিমতা উক্তম্—ক্ষণং অপেক্ষস্ব যাবদহং বৃক্ষমারোহামি। তথানুষ্ঠিতে যাবৎ সিংহঃ সজীবঃ কৃতঃ তাবত্তে ত্রয়োঽপি সিংহেন উত্থায় ব্যাপাদিতাঃ। স চ বুদ্ধিমান্ সিংহে স্থানান্তরং গতে বৃক্ষাদবতীর্য্য গৃহং গতঃ।

পঞ্চমঃ পরিচ্ছেদঃ।

1. (a) Translate into Sanskrit :—

বালক শয্যায় শুইতেছে। লোভ পাপের কারণ। অশ্ব ঘাস খাইতেছে। রাম স্নানের জন্য গঙ্গানদীতে গিয়াছেন। আমি জল দিয়া গা ধুইতেছি। আমরা দুইজনে আজ বাড়ী যাইব। দুর্জ্জন-সঙ্গ ত্যাগ কর। রাজা প্রজাদিগকে রক্ষা করেন। পুষ্পদ্বারা দেবতাদিগকে অর্চ্চনা কর। অধ্যাপককে প্রণাম কর। গুরুজনের আদেশ প্রতিপালন কর। তিনি আসন হইতে উঠিতেছেন। পিতার হাত ধর। রাম সীতা ও লক্ষ্মণের সহিত বনে গিয়াছিলেন। বৃক্ষেরও চেতনা আছে। যাহার বিদ্যা নাই তাহার সুখ কোথায়? পরের দ্রব্যে লোভ করিও না। আলস্য সকল দোষের আকর। পরোপকার হইতে শ্রেষ্ঠ ধর্ম্ম নাই।

(b) Drink the milk. Bring my dress. Sit by me. Can he sing? Who can run? I shall save him. Rama became angry. He can dig. He came and I went away. Let us go home. She will help me. He wished to see the king. I have come just now. Let us pray to God. This is a nice field. Come into my house. We did not give it to you. I began to study. Is this her pen? What will he do? Where were you born? God made the sun and the moon. I told him to do. We see with our eyes. Do not tell a lie. Do not kill the bird. I told him to do the work. I shall give you a book. Our soul will never die. Tigers do not eat grass. What are you doing? Hari is now within the room. Distresses result from sin. Men obtain the fruit of their labour. Warriors fight with their enemies. Go to a village by a chariot. Gods are pleased by good conduct. Do not earn money if you do not give it to the poor. The king punishes the offenders and protects the innocent. Let Rama go home. He brought him there. The boy climbed up the tree for fragrant flowers.

Correct :—

वेगवान् नदी। बालका पश्यति। ज्ञानिनः गच्छति। नरपत्युः गृहं पश्य। वारिं आनय। चन्द्रमां पश्य।

निम्नि आगच्छति। एतत् मम सुहृदस्य गृहम्। कस्य एष पुस्तकः। माता पूजनीयः। बालिका रोदति। अनेन पथेन गच्छ। युवा गृहं गता। अयं बालकः हसन्ति। बलवान् तस्य लज्जा। त्वं सत्यं वदतु।

षष्ठः परिच्छेदः।

त्रयाणां धूर्त्तानां।

अस्ति कस्मिंश्चिदधिष्ठाने मित्रशर्म्मा नाम ब्राह्मणः। स यज्ञार्थं ग्रामान्तरं गतः। कश्चित् यजमानो याचितः भो यजमान आगामिन्यां अमावस्यायां यक्ष्यामि यज्ञं। तत् यागार्थं पशुमेकं समर्पय। अथ तेनातीव पीवरतनुः पशुः प्रदत्तः। सोऽपि तम् पशुमितश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा सत्वरं पुराभिमुखं प्रतस्थे। अथ तस्य गच्छतो मार्गे त्रयो धूर्त्ताः क्षुत्क्षामकण्ठाः संमुखीना बभूवुः। तैस्तादृशं पीवरतनुं पशुं स्कन्धेकृतमालोक्य मिथोऽभिहितम्। यदेष छागः केनाप्युपायेन लभ्यते, तदा आत्मप्रकर्षो भवति। इति समालोच्य तेषामेकतमो वेशपरिवर्त्तनं विधाय ब्राह्मणस्य समीप-

मागत्य इदमुचे।—भो ब्राह्मण! किमेवं लोकविद्विष्टं अपवित्रं सारमेयं स्कन्धे निधाय गच्छसि? ब्राह्मणेनाभिहितम्।—अहो किमन्धो भवान् यत् छागशिशुं सारमेयं प्रतिपादयति। स आह।—ब्राह्मण! न कोपः कार्य्यः। यथेच्छं गम्यताम्। अथ यावत् किञ्चिद्ध्वान्तरं गच्छति, तावत् द्वितीयो धूर्त्तः सम्मुखमभ्युपेत्य तमुवाच।—भो ब्राह्मण कष्टं कष्टम्। यदि वल्लभोऽयं ते सारमेयः तथापि स्कन्धं नेतुमयोग्यः। अथासौ सकोपमिदमाह।—भोः किमन्धो भवान् यत् छागं सारमेयं वदति। सोऽब्रवीत्—भगवन् मा कोपं कुरु। अज्ञानात् मया अभिहितम्। त्वम् आत्मनोऽभिलषितं समाचर।

अथ यावत् स्तोकं गच्छति तावत् तृतीयोऽन्यवेशधारी धूर्त्तः सम्मुखं समुपेत्य तम् उवाच।—भो अयुक्तमेतत् यत् त्वं सारमेयं स्कन्धमारोप्य गच्छसि। तत् त्यज्यताम् एष यावदन्यः कश्चित् न पश्यति। अथासौ विप्रो बहु विमृश्य तं छागशिशुं सारमेयमेव निश्चित्य भयात् भूमौ प्रक्षिप्य स्वगृहमुद्दिश्य पलायितः। ततस्ते मिलित्वा तं पशुमादाय प्रतस्थिरे।

———

व्याघ्रचर्म्माच्छादितरासभस्य कथा ।

अस्ति कस्मिंश्चिदधिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म । तस्यैको रासभोऽस्ति । सोऽपि आहाराभावादतिदुर्व्वलः । अथ तेन रजकेन क्वापि व्याघ्रचर्म्म प्राप्तम् । ततः स चिन्तितवान् ।—अहो शोभनमापतितम् । एतच्चर्म्मणा परिच्छाद्य रासभं रात्रौ यावत् क्षेत्रेषु उत्सृजामि येन व्याघ्रं मत्वा समीपवर्त्तिनः क्षेत्रपाला एनं न निष्कासयन्ति । तथानुष्ठिते रासभो रात्रौ यथेच्छया यवभक्षणं करोति । रात्रिशेषेऽपि भूयो रजकः स्वाश्रयं नयति । एवं गच्छता कालेन स रासभः पीवरतनुर्जातः । अथैकदा रासभः क्षेत्रेषु तारस्वरेण शब्दितुमारब्धः । ततः क्षेत्रपतयो रासभोऽयं व्याघ्रचर्म्म प्रतिवहन् इति मत्वा लगुड़प्रहारेण तं व्यापादितवन्तः ।

वकर्कटयोः ।

अतिलौल्याद्वकः कश्चिन्मृतः कर्कटकग्रहात् ।

अस्ति कस्मिंश्चिद्वने महत् सरः । तत्रैको वकः स्थितः । स तु वार्द्धक्यात् मत्स्यान् व्यापादयितुमसमर्थः । अथ कदाचिदसौ क्षुत्क्षामः तस्य सरसस्तीरे उपविष्टः अश्रुप्रवाहैर्धरातलम् अभिषिञ्चन् रुरोद ।

अथैकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे।—माम किमद्य त्वया आहारवृत्तिर्नानुष्ठीयते, कथं वा रुद्यते। स प्राह—सत्य-मुपलक्षितं भवता। अहं मत्स्यादः। परं मया वैराग्यात् साम्प्रतं अनशनव्रतमवलम्बितम्। कुलीरकस्तत् श्रुत्वा प्राह।—माम किं ते वैराग्यकारणम्? स आह—वत्स! अहमस्मिन् सरसि जातो वृद्धिं गतश्च। मयैतत् श्रुतम् द्वादशवार्षिकी अनावृष्टिः सम्प्रत्यते।

कुलीरकः प्राह—कस्मात् श्रुतं भवता। वक आह—दैवज्ञमुखात्। एतत् सरः स्वल्पतोयम् संवृत्तं शीघ्रं शोषं यास्यति। अस्मिन् शुष्के यैः सह अहं वृद्धिं गतः सदैव क्रीड़ितश्च एते सर्व्वे तोयाभावान्नाशं यास्यन्ति। तत्तेषां वियोगमहं द्रष्टुमसमर्थः। तेनैतदनशनव्रतमव-लम्बितम्। साम्प्रतं सर्व्वेषां स्वल्पजलाशयानां जलचराः स्वजनैः गुरुजलाशयेषु नीयन्ते। मकरजलहस्तिप्रभृतयः स्वयमेव गच्छन्ति। अत्र पुनः सरसि ये जलचराः ते निश्चिन्ता स्तिष्ठन्ति। अथ तदाकर्ण्य तद्वचनं अन्येषां जलचराणां निवेदयामास।

ततस्ते सर्व्वे भयव्याकुलमनसो मत्स्यकच्छपप्रभृ-तय आगत्य तं वकं पप्रच्छ।—माम अस्ति कश्चिदुपायो

येनास्माकं रक्षा भवति। वक्र आह—अस्त्रास्य जलाशयस्य नातिदूरे प्रभूतजलं महत् सरः। यच्चतुर्विंशत्यापि वर्षैः अवृष्टेऽपि पर्जन्ये न शुष्यति। तत् यदि मम पृष्ठं कश्चिदारोहति तमहं तत्र नयामि।

अथ ते जलचरा विश्वासमापन्नास्तातमातुलभ्रातरिति ब्रुवाणाः अहं पूर्व्वं अहं पूर्व्वमिति वदन्तः समन्तात् परितस्थुः। सोऽपि दुष्टाशयः तान् क्रमेण पृष्ठमारोप्य जलाशयस्य नातिदूरे स्थितां विस्तीर्णां शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयितुमारेभे। एवं स जलचराणां मिथ्यावार्त्ताकथनैः मनांसि नित्यमेव रञ्जयन् आहारवृत्तिमकरोत्।

अथ अन्यस्मिन् दिवसे स कुलीरकेणोक्तः।—माम मया सह ते प्रथमः स्नेहसम्भाषः सञ्जातः। तत् किं मां परित्यज्य अन्यान् नयसि तस्मादद्य मे प्राणत्राणं कुरु। तदाकर्ण्य सोऽपि दुष्टाशयश्चिन्तितवान्।—अहोऽहं मत्स्यमांसानाम्। तदद्य एनं कुलीरकं भक्षयामि। इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः।

कुलीरकोऽपि दूरादेव अस्थिपर्व्वतं शिलासमीपे समुद्वीक्ष्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत्।—माम

कियद्दूरे स जलाशयः। स मन्दधीर्जलचरोऽयं न स्थले प्रभवतीति सस्मितमिदमाह। कुलीरक कुतोऽन्यो जलाशयः मम प्राणयात्रेयम्। तस्मात् स्मर्य्यतामभीष्टदेवता। त्वामपि अस्यां शिलायां प्रक्षिप्य भक्षयामि। इत्युक्तवति तस्मिन् कुलीरको दशनसन्दंशेन तस्य वकस्य मृणालधवलां मृदुग्रीवां चकर्त्त। वकश्च पञ्चत्वं गतः।

अथ कुलीरकस्तां वकग्रीवां समादाय शनैः शनैः स्वज्जलाशयमाससाद। ततः सर्व्वैरेव जलचरैः पृष्टः। भोः कुलीरक किं प्रतिनिवृत्तस्त्वम्। स च तव मातुलको न समायातः। किं स चिरयति। वयं सर्व्वे समुत्सुकाः क्षतेक्षणास्तिष्ठामः।

एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच। मूर्खाः सर्व्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मायुःशेषतया विश्वासघातकस्याभिप्रायं ज्ञात्वा ग्रीवेयमानीता। तदलमुद्वेगेन। अधुना सर्व्वेषां जलचराणां क्षेमं भविष्यति।

———

सिंहशृगालादीनाम् ।

कस्मिंश्चिद्वने चण्डरवो नाम शृगालः प्रतिवसति स्म। स कदाचित् क्षुधाविष्टो नगरान्तरे प्रविष्टः। अथ नगरवासिनः सारमेया अवलोक्य तं तीक्ष्णदंष्ट्राग्रैर्भक्षयितुमारब्धवन्तः। स प्राणभयात् पलायमानः प्रत्यासन्नं रजकगृहं प्रविष्टः। तत्र नीलीरसपूर्णमहाभाण्डमासीत्। स तस्मिन् पपात। अथ तस्मान्निष्क्रान्तो नीलीवर्णः सञ्जातः। ततः सर्वे ते सारमेयाः तं शृगालमजानन्तो यथाभीष्टदिशं जग्मुः। चण्डरवोऽपि दूरतरप्रदेशमासाद्य काननाभिमुखं प्रतस्थे।

अथ तदपूर्वं सत्वमवलोक्य सर्वं सिंहव्याघ्रद्वीपप्रभृतयोऽरण्यनिवासिनो भयव्याकुलमनसः समन्तात् पलायनक्रियां कुर्वन्ति कथयन्ति च। न ज्ञायतेऽस्य कीदृग्विचेष्टितं पौरुषञ्च। तद्दूरतरं गच्छामः।

चण्डरवोऽपि भयव्याकुलितान् विज्ञाय इदमाह— भो भोः श्वापदाः किं यूयं मां दृष्ट्वा सन्त्रस्ता व्रजथ। न भेतव्यं न भेतव्यं। अहमद्य ब्रह्मणा स्वयमेव आहूयाभिहितः। यत् श्वापदानां सर्व्वेषां कश्चिद् राजा नास्ति तत् त्वं मयाद्य सर्व्वश्वापदप्रभुत्वेऽभिषिक्तः। अतः

क्षितितले गत्वा सर्व्वान् प्रतिपालय। अतोऽहमत्रागतः। अहं कक्कुद्रुमो नाम त्रैलोक्ये श्वापदराजः सञ्जातः। तच्छ्रुत्वा ते श्वापदाः सिंहपुरःसराः स्वामिन् प्रभो समादिशेति वदन्तस्तं परिवव्रुः।

अथ तेन सिंहाय अमात्यपदवी प्रदत्ता। व्याघ्राय शय्यापालत्वं द्वीपिने ताम्बूलाधिकारो वृकाय द्वारपालत्वं प्रदत्तं। ये च आत्मीयाः शृगालाः तैः सह आलापमात्रमपि न करोति। शृगालाः सर्व्वेऽपि निःसारिताः।

एवं स राजक्रियायां वर्त्तते। ते च सिंहादयो मृगान् व्यापाद्य तस्य पुरतः प्रक्षिपन्ति। सोऽपि प्रभुधर्म्मेण सर्व्वेषां विभज्य प्रयच्छति।

एवं गच्छति काले कदाचित् दूरदेशे शब्दायमानस्य शृगालवृन्दस्य कोलाहलमाकर्ण्य पुलकिततनुः आनन्दाश्रुपूर्णः उत्थाय स चण्डरवस्तारस्वरेण विरोतुमारब्धवान्।

अथ ते सिंहादयः तस्य तं शब्दमाकर्ण्य शृगालोऽयमिति ज्ञात्वा सलज्जम् अधोमुखा क्षणमेकं स्थिताः। ततो मिथः प्रोचुः भो बाहिता वयम् अनेन क्षुद्रशृगालेन। तद्धत्यताम् बध्यतामयम्। सोऽपि तदाकर्ण्य पलायितुमिच्छन् सिंहादिभिः खण्डशः कृतः।

षष्ठः परिच्छेदः।

Translate into Sanskrit :—

(*a*) এই সম্মান দ্বারা অনুগৃহীত হইলাম। এই ভিক্ষুককে একখানি কাপড় দাও। এই নগরে অনেক বিদ্বান্ বাস করেন। হে ঈশ্বর! তুমি আমার বন্ধু। জ্ঞানীরা সর্ব্বদা পরোপকার করেন। তপস্বীরা হৃষ্ট মনে বলেন, "তোমার মঙ্গল হউক।" পাপীরা পুণ্যাত্মাদিগকে নিন্দা করে। আমি দুইখানি জাহাজ দেখিয়াছি। বিনয়-প্রযুক্ত বিশ্বামিত্র ব্রাহ্মণত্ব পাইয়াছিলেন। রাজারা মুনিদিগের আশ্রম দেখিয়া সন্তুষ্ট হইলেন। যে দেশে চিকিৎসক নাই সেই দেশ ত্যাগ করা উচিত। অতিথির পূজা করা সকলেরই উচিত। জ্ঞান ব্যতীত মুক্তি লাভ হয় না। তোমাকে ব্যতীত আমি মুহূর্ত্তও বাঁচিয়া থাকিতে পারি না। ঈশ্বর তোমাদিগকে রক্ষা করিয়াছেন; তাঁহাকে ভজনা কর। তিনি প্রিয় শিষ্যের মৃত্যুতে ব্যথিত হইয়াছিলেন। যে ব্যক্তি সাধুদিগকে দণ্ড দেয় সে নরকে গমন করে। বিশ্বামিত্র মুনি রামকে অনেক অস্ত্র দিয়াছিলেন।

(*b*) My younger brother has sent these sweet fruits. I wrote a letter this morning. There can

be no pleasure without pain. What are you doing? Boys learn their lessons. I can write better than he. Rice grows in the field. Wonderful is his power. They advise us. My mother loves me. Father or son is going. Neither he nor I am in fault. The lamp is gone out. I have not yet finished my reading. I will go with you presently. He will bring it for me, not for you. He can see only with one eye. You go before, I shall follow after. I spoke softly. She sings sweetly. Let him worship God with pure heart. Let Rama sit here in the shade of the tree. Men should not forget friends. Pupils should salute their teacher. He is followed by her. I lived in that forest for a long time. Thou art a wise man. I asked you where my book was. I gave you this reward. Give me that delicious mango.

Correct :—

सुन्दरो बालिका गायति। सः कर्म्म कुर्व्वन्ति। रामः दरिद्रम् धनं ददाति। धनवानस्य सत्कार्य्यमेषः। वृक्षे पक्षयः वसन्ति। पिता पुत्रं पृच्छन्ति। राजाः दुष्टान् दण्डयन्ति। अत्र सन्देहमस्ति। साधुः परद्रव्यं न गृह्णन्ति। मधुं पिव। शरदि नभोमण्डलः निर्म्मलं भवति।

सप्तमः परिच्छेदः ।

जगदीशस्तोत्रम् ।

यस्यैव लब्ध्वा करुणां प्रकामं
जगत् प्रपश्यामि सदैव रम्यम् ।
यस्माच्च सर्व्वं प्रसृतं शिवं नो
नमामि तस्मै जगदीश्वराय ॥ १ ॥
ज्ञानं च धर्म्मं प्रददाति नित्यं
अर्थं च कामञ्च तथैव सर्व्वम् ।
रिपोर्विनाशाय शुभङ्कराय
नमामि तस्मै जगदीश्वराय ॥ २ ॥
सूर्य्यश्च चन्द्रो गगने प्रयाति
गन्धं गृहीत्वा पवनश्च वाति ।
गुञ्जन्ति भृङ्गाः कृपया च यस्य
नमोऽस्तु तस्मै जगदीश्वराय ॥ ३ ॥
उत्साहवह्निं मनसि प्रधुक्ष्य
आलस्यजातां जड़तां विहाय ।
करोषि सर्व्वं दयया च यस्य
नमो नमस्तज्जगदीश्वराय ॥ ४ ॥

हिताहितं नो न कदा विचार्यं
परोपकारः सततञ्च कार्य्यः ।
परस्य सेवा परमञ्च धर्म्मः
लभस्व तेन विपुलञ्च शर्म्म ॥ ५ ॥
महान् महद्भ्यो गुरुरेव भूमा
अणोरणीयान् न च यस्य सीमा ।
आश्चर्य्यभूताय दयामयाय
नमो नमस्तज्जगदीश्वराय ॥ ६ ॥
कामञ्च कोपं परवस्तुलोभं
मात्सर्य्यमोहौ मदजातसर्व्वं ।
शक्नोमि हातुं जगदीश येन
याचेऽहमेतत् सततं प्रणत्या ॥ ७ ॥

राजभक्तिः ।

अष्टाभिश्च सुरेन्द्राणां मात्राभि र्निर्म्मितो नृपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
हरेयुर्बलवन्तोऽपि दुर्बलानां परिग्रहान् ।
हन्युर्व्यायच्छमानाश्च यदि राजा न पालयेत् ॥

यानवस्त्राण्यलङ्कारान् रत्नानि विविधानि च।
हरेयुः सहसा पापा यदि राजा न पालयेत्॥
राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम्।
राजा पिता च माता च प्रकृतीनाञ्च कृत्स्नशः॥
राज्ञो यत्र परीवादः निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥
यो हि प्राणव्ययेनापि राज्ञः प्रियं चिकीर्षति।
भुङ्क्ते स विपुलान् भोगान् प्रेत्य स्वर्गे महीयते॥
हिरण्यं धान्यरत्नानि यानानि विविधानि च।
तथान्यदपि यत्किञ्चित् प्रजानां स्यान्नृपस्य तत्॥
यथाहि चन्द्रमा रात्रौ पीयूषवर्षणेन हि।
हर्म्यं पर्णकुटीरञ्च समुल्लासयते सदा॥
यथा च वारिदोऽमृतं निर्विशेषं प्रवर्षति।
तथाहि नृपतिः सर्व्वान् समन्तुष्यति सर्व्वदा।
राजन्येवानुरागस्य सततं यत् प्रदर्शनम्।
प्रजानां तद्धि कर्त्तव्यं यावज्जीवनधारणम्॥

———

उपदेशावली ।

(१)

वरमेको गुणी पुत्रो न च मूर्खशतैरपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि ॥
रूपयौवनसम्पन्नाः विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्व्वं सुपुत्रेण कुलं यथा ॥
मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।
आत्मवत् सर्व्वभूतेषु यः पश्यति स पण्डितः ॥
उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥
चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्व्वमायतनं त्यजेत् ॥
धनिकः श्रोत्रियो राजा नदी वैद्यश्च पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्ज्जयेत् तादृशं बन्धुं विषकुम्भं पयोमुखम् ॥

दुर्ज्जनः प्रियवादीति नैतद्विश्वासकारणम्।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम्॥
एकेनापि कुवृक्षेण कोटरस्थेन वह्निना।
दह्यते तद्वनं सर्व्वं कुपुत्रेण कुलं यथा॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा॥

(२)

अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥
नास्ति सत्यात् परो धर्म्मः नानृतात् पातकं परम्।
स्थितिर्हि सत्यं धर्म्मस्य तस्मात् सत्यं न लोपयेत्॥
न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥
उत्थानेन सदा पुत्र प्रयतेथा युधिष्ठिर।
नह्युत्थानादृते दैवं कस्याप्यर्थं प्रसाधयेत्॥
उत्थानेनामृतं लब्धमुत्थानेनासुरा हताः।
उत्थानेन महेन्द्रेण श्रैष्ठ्यं प्राप्तं दिवीह च॥
उत्थानवीरः पुरुषो वाग्वीरानधितिष्ठति।
उत्थानवीरान् वाग्वीरा रमयन्त उपासते॥

अबुद्धिमाश्रितानान्तु क्षन्तव्यमपराधिनाम्।
नहि सर्व्वत्र पाण्डित्यं सुलभं पुरुषेण वै॥
असन्तोषपरा मूढ़ाः सन्तोषं यान्ति पण्डिताः।
असन्तोषस्य नास्त्यन्त सुष्टिस्तु परमं सुखम्॥

(३)

असतां प्रतिषेधश्च सताञ्च परिपालनम्।
एष राज्ञां परो धर्म्मः समरे चापलायनम्॥
मातरं पितरञ्चैव शुश्रूषन्ते जितेन्द्रियाः।
भ्रातृणाञ्चैव सन्नेहास्ते नराः स्वर्गगामिनः॥
यो हि न भाषते किञ्चित् सर्व्वदा भ्रूकुटीमुखः।
द्वेष्यो भवति भूतानां स सान्त्वमिह नाचरन्॥
यस्तु सर्वमभिप्रेक्ष्य पूर्व्वमेवाभिभाषते।
स्मितपूर्व्वाभिभाषी च तस्य लोकः प्रसीदति॥
नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखम् नास्ति त्यागसमं सुखम्॥
अहिंसा सत्यवचनं सर्व्वभूतेषु चार्জ्जवम्।
क्षमाचैवाप्रमादश्च यस्यैते सः सुखी भवेत्॥

(४)

न धर्म्मार्थी नृशंसेन कर्म्मणा धनमर्জ्जयेत्।
शक्तितः सर्व्वकार्य्याणि कुर्य्यान्नर्द्धिमनुस्मरेत्॥

विशेषस्तत्र विज्ञेयो न्यायेनोपार्ज्जितं धनम्।
पात्रे काले च देशे च साधुभ्यः प्रतिपादयेत्॥
अन्यायात् समुपात्तेन दानधर्म्मो धनेन यः।
क्रियते न स कर्त्तारं त्रायते महतो भयात्॥
न संशयमनारुह्य नरो भद्राणि पश्यति।
संशयं पुनरारुह्य यदि जीवति पश्यति॥
ऋणशेषमग्निशेषं शत्रुशेषं तथैव च।
पुनः पुनः प्रवर्द्धन्ते तस्माच्छेषं न धारयेत्॥
परिनिर्मथ्य वाग्जालं इदमेव सुनिश्चितम्।
नोपकारात् परं पुण्यं नापकारादघं परम्॥
यदन्यैर्विहितं नेच्छेदात्मनः कर्म्मपूरुषः।
न तत् परेषु कुर्व्वीत जानन्नप्रियमात्मनः॥
निश्चित्य यः प्रक्रमते नान्तर्वसति कर्म्मणः।
अवन्ध्यकालो वश्यात्मा सर्वैः पण्डित उच्यते॥
अर्थं महान्तमासाद्य विद्यामैश्वर्य्यमेव वा।
विचरत्यसमानङ्गः यः सः पण्डित उच्यते॥

(५)

द्वाविमौ पुरुषौ राजन् स्वर्गस्योपरितिष्ठतः।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान्॥

सत्येन रक्ष्यते धर्म्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते॥
न कुलं वृत्तहीनस्य प्रमाणं इति मे मतिः।
अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते॥
जिता सभा वस्त्रवता मिष्टाशा गोमता जिता।
अध्वा जितो यानवता सर्वं शीलवता जितम्॥
शीलं प्रधानं पुरुषे तदृयस्येह प्रणश्यति।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः॥
सम्पन्नतरमेवान्नं दरिद्रो भुञ्जते सदा।
क्षुत् स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा॥
पापं प्रज्ञां नाशयति क्रियमाणं पुनःपुनः।
पुण्यं प्रज्ञां वर्द्धयति क्रियमाणं पुनःपुनः॥
दिवसेनैव तत्कुर्य्यात् येन रात्रौ सुखं वसेत्।
अष्टमासेन तत् कुर्य्यात् येन वर्षा सुखं वसेत्॥
पूर्व्वे वयसि तत् कुर्य्यात् येन वृद्धः सुखं वसेत्।
यावज्जीवन्तु तत् कुर्य्यात् येन प्रेत्य सुखं वसेत्॥

(६)

अक्रोधेन जयेत् क्रोधं असाधुं साधुना जयेत्।
जयेत् कदर्य्यं दानेन जयेत् सत्येन चानृतम्॥

সুখার্থিনঃ কুতো বিদ্যা নাস্তি বিদ্যার্থিনঃ সুখম্।
সুখার্থী বা ত্যজেদ্বিদ্যাং বিদ্যার্থী বা সুখং ত্যজেৎ॥
ন হ্যয়নৈর্ন পলিতৈর্ন বিত্তেন ন বন্ধুভিঃ।
ঋষয়শ্চক্রিরে ধর্ম্মং যোঽনুচানঃ স নো মহান্॥
ন পাপে প্রতিপাপঃ স্যাৎ সাধুরেব সদা ভবেৎ।
আত্মনৈব হতঃ পাপো যঃ পাপং কর্ত্তুমিচ্ছতি॥
হর্ষস্থানসহস্রাণি ভয়স্থানশতানি চ।
দিবসে দিবসে মূঢ়মাবিশন্তি ন পণ্ডিতম্॥

সপ্তমঃ পরিচ্ছেদঃ।

Translate into Sanskrit :—

(*a*) তিনি বন্ধুর সহিত আলাপ করিতেছেন। রাবণ রামের সহিত যুদ্ধে মরিয়াছিলেন। বালকগণ পুস্তক পড়িয়াছিল। শত্রুগণ আমাদিগকে পরাজিত করিবে। ঈশ্বরই জগতে একমাত্র বন্ধু। তোমরা আমাকে পরিত্যাগ করিও না। ধর্ম্ম ব্যতীত পৃথিবীতে সুখ নাই। তিনি পরের উপকার করেন। এই নদীর জল অতিশয় মধুর। কুকুরের সহিত ব্যাঘ্র যুদ্ধ করিতেছে। পুণ্যশীল রাজা ইন্দ্রের সহিত বসেন। সুহৃদ্ ভিন্ন কে এই সঙ্কটে রক্ষা

করিবেন। যাহারা আপনার কার্য্য করে ঈশ্বর তাহাদের সহায় হন। যে পরের অনিষ্ট করে তাহাকে ধিক্। বিধাতা বিনা এই দুঃখ কেহ নিবারণ করিতে পারিবেন না। তোমরা আমাকে ত্যাগ করিয়া যাইও না।

(*b*) Rama will start to-morrow for Benaras. Neither Hari nor his brother can do this work. I do not long for wealth. I have no time to see him. I consider him as a villain. He went to the forest to bring some fruits. Forget not to do good. None are completely happy. Birds are singing sweetly. Consider well before you make a promise. The sun is set. There is no cloud in the blue sky. He must go to the town. You should not take fruit. What is the cause of your silence? I am very anxious. I am quite well. I shall take with me some books. I have a beautiful garden. I shall rise early in the morning. We are able to earn our food. Idleness is our great enemy. He is known to all. Who is suffering from thirst? I saw him sitting in the house. It is all true. I wish you would say this. I have no other way. Why do you not come to-morrow? A kind man asked the cause of his distress. A man has arms and two legs. He had many relations. Learning is superior to wealth. A good man is really happy. Knowledge is better than wealth.

Correct :—

কুপ্যতি রাক্ষসাঃ নিত্যম্। স বালিকা এতং কার্য্যং করিষ্যতি। কে নরঃ শুভং নেচ্ছন্তি। অহং রামং বারিং

दास्यामः। मुञ्चतु मां वत्स! एकस्मिन् रात्रे चौरः गृहे प्रविशन्ति स्म। केन वृत्तिना त्वं जीवसि। भक्तिना देवान् अर्चय। सर्व्वाः नराः सत्यं न भाषन्ते। अहमेकदा नक्षत्राणि अपश्यत्। पुत्रस्य सह विरोधं न कर्त्तव्यः। सा गृहकर्म्म कृतवान्। शृणुहि वत्स! मम वाक्यम्। एतेनार्थ्यः किं करिष्यति? वर्षायां मयूराः नृत्यन्ति। प्रभुः मयि सदयो भव। यत्र भवान् गच्छसि, तत्राहं गमिष्यन्ति। वायु लतान् चालयति। इदं ज्योत्स्नामयी निशि। धनवानस्य सत्कर्म्म सतिरस्तु। महाराजा तत्र गच्छन्ति। रामोवाच एवं कुरु हि। आगच्छ भवान् अत्रोपविश। ये यशस्वो ते जीवतु। राजाः प्रजान् पालयन्ति। सः परोपकाराय प्राणं त्यजन्ति। सः कोमलां शय्यां शेते। पितो रक्ष मां। विदुषं पृच्छ धर्म्मम्। यथाशक्तिं कर्म्म कुरु। अन्यं वस्तुमानय। तस्य मित्रः सर्व्वं जानन्ति। सः भक्तिना तोषयति। सदा हि ते विवदन्ति। कुवाक्यः कदापि न वक्तव्यः। नमो देवान्।

समाप्ता।